श्रीरामचन्द्रविरचितं

# ॥ श्रीनृसिंह-पञ्चामृत-स्तोत्रम् ॥

अहोबिलं नारसिंहं गत्वा रामः प्रतापवान् ।
नमस्कृत्वा श्रीनृसिंहं अस्तौषीत् कमलापतिम् ॥

गोविन्द केशव जनार्दन वासुदेव
विश्वेश विश्व मधुसूदन विश्वरूप! ।
श्रीपद्मनाभ पुरुषोत्तम पुष्कराक्ष
नारायणाच्युत नृसिंह नमो नमस्ते ॥ १ ॥

देवाः समस्ताः खलु योगिमुख्याः
गन्धर्व-विद्याधर-किन्नराश्च ।
यत्पादमूलं सततं नमन्ति
तं नारसिंहं शरणं गतोऽस्मि ॥ २ ॥

वेदान् समस्तान् खलु शास्त्र गर्भान्
विद्या बलं कीर्तिमतीं च लक्ष्मीम् ।
यस्य प्रसादात् पुरुषा लभन्ते
तं नारसिंहं शरणं गतोऽस्मि ॥ ३ ॥

ब्रह्मा शिवस्त्वं पुरुषोत्तमश्च
नारायणोऽसौ मरुतां पतिश्च ।
चन्द्रार्क-वाय्वग्नि-मरुद्गणाश्च
त्वमेव तं त्वां सततं नतोऽस्मि ॥ ४ ॥

स्वप्नेऽपि नित्यं जगतामशेषं
स्रष्टा च हन्ता च विभुरप्रमेयः ।
त्राता त्वमेकं त्रिविधो विभिन्नः
तं त्वां नृसिंहं सततं नतोऽस्मि ॥ ५ ॥

इति स्तुत्वा रघुश्रेष्ठः पूजयामास तं हरिम् ।